Gyanshauryam, International Scientific Refereed Research Journal
© 2021 GISRRJ | Volume 4 | Issue 5 | ISSN : 2582-0095

# अलंकारशास्त्रीयध्वनिविमर्शः

**राजश्री चट्टोपाध्याय**

**सहकारी अध्यापिका, संस्कृतविभागः, गुरुदासकलेजः, पश्चिमवङ्गः।**

**Article Info**
Volume 4 Issue 5
Page Number: 79-87

**Publication Issue :**
September-October-2021

**Article History**
Accepted : 01 Sep 2021
Published : 30 Sep 2021

**सारांशः-** प्राचीनकाले प्रसिद्धा आसन्निति सर्वेषामप्यालङ्कारशास्त्रविदुषां सम्मुखे प्रधानविवेच्यविषय आसीत् – काव्यस्य आत्मतत्त्वस्थानीयं किं भवति वस्तु ? इति । विषय एष एव सर्वदा सर्वथा च विवेच्य आसीत् तेषाम् काव्ये सत्सु अन्येष्वपि वस्तुषु कीदृशं वस्तु काव्ये वास्तविकं चैतन्यमुद्भावयति? किमस्ति तादृशं वस्तु यस्य उपस्थित्या अन्येषां काव्यशोभाकराणां वस्तूनामावश्यकता न भवति? अस्य प्रश्नस्योत्तरप्रदाने एव अलङ्कारशास्त्रस्य नाना सम्प्रदायानामुत्पत्तिर्जाता । केचन “अलङ्काराः एव काव्यस्य प्राणभूता” इति प्रत्यपादयन्। अन्ये केचन गुणान्काव्यात्मभूतान् मन्वते अपरे केचिद्रीतिरेव काव्यात्मा इति अकथयन्। परन्तु आचार्येणानन्दवर्धनेन सहृदयानाम् सिद्धान्तमाधारीकृत्य यत् ध्वनिरेव काव्यस्यात्मेति इति अङ्गीकृतम्। आनन्दवर्धनेन आनीतस्य सिद्धान्तितस्य च आस्वादनं कृत्वा पश्चात्काले अन्ये आलङ्कारिकाः ध्वनिसिद्धान्तममुं अङ्गीकृतवन्तः। तच्च बहुभिस्समादृतस्सन् लोकप्रियत्वम् आगतम्। अतः मया लेखेऽस्मिन् अस्याः ध्वनेः स्वरूपं, तल्लक्षणं, भेदादयः विचार्यन्ते।

**विशेषशब्दाः**–प्रतीयमानार्थः, ध्वनिशब्दः, ध्वनिस्वरूपम्, ध्वन्यभाववादिनः, भाक्तवादिनः,अविवक्षितवाच्यध्वनिः, विवक्षितान्यपरवाच्यध्वनिः, असंलक्ष्यव्यंग्यम् , संलक्ष्यक्रमव्यंग्यं चेतीत्यादयः।

**भूमिका-** प्राचीनभारतीयवाङ्मये अलंकारशास्त्रस्य पृथगेव वैशिष्ट्यं वरीवर्ति इति अलङ्कारशास्त्रीयैः नैके ग्रन्थाः विलिखिताः तैस्तैराचार्यैः। आधुनिकेषु सर्वप्रथमोऽलङ्कारशास्त्रग्रन्थो भामहप्रणीतः काव्यालङ्कार एव इति अतः शास्त्रस्य नाम अलङ्कारशास्त्रमिति जातम्। पुरा काव्यजीवनतया अलङ्कारा एव मन्यन्ते स्म। समेषामलङ्कारग्रन्थानामनुशीलनेन ज्ञायते यत् अलङ्कारशास्त्रस्य नैके सम्प्रदायाः वर्तन्ते। सत्यपि शास्त्रेऽस्मिन् काव्यस्वरूप-दोष-गुण-रीत्यलङ्काराणामपि निरूपणीयत्वे अस्य अलङ्कारशास्त्रनाम्नैव व्यापदेशस्य वीजं तत्वतः प्रच्छन्नमस्ति तथापि अलङ्क्रियतेऽनेनति करणव्युत्पत्या यमकोपमादिबोधको नायमलङ्कारशब्दः, किन्तु अलङ्कृतिरलङ्कारःइति भावव्युत्पत्त्या दोषापगमगुणालङ्कारसंवलनकृतसैन्दर्यपरः, तत्प्रतिपादकत्वात् शास्त्रमिदमलङ्कारशास्त्रनाम्ना व्यपदिश्यते। तत्र मानन्तु वामनाचार्यादिनां काव्यं ग्राह्यमलङ्कारात्, सौन्दर्यमलङ्कारः इति सूत्रे इति।

साहित्यशास्त्रे विद्यमानेषु सम्प्रदायेषु सर्वाधिकविशिष्टः सर्वमान्यश्च सम्प्रदायः ध्वनिसम्प्रदाय एव। यद्यपि ध्वनिसम्प्रदायस्य आगमनात् पूर्वमपि सम्प्रदायाः सिद्धान्ताश्च काव्यतत्त्वाण्वेषणपरा आसन्, परन्तु ते सर्वेऽपि ध्वनिसम्प्रदायस्योत्पतत्त्यनन्तरं जीमूतान्तर्गताः दिनकरप्रकाशतुल्याः जाताः। आनन्दवर्धनस्य ध्वनिसिद्धान्तः काव्यशास्त्रस्य मध्यस्थे काले समुत्पन्नः भूत्वा

**Copyright: ©** the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

मध्ये स्थित्वा पूर्ववर्तिनां परवर्तीनां च मध्ये सेतुबन्धनं स्थापितवान्। सर्वान् अपि सम्प्रदायान् आनन्दवर्धनाचार्यः पोषयामास। ध्वनिरेव ध्वस्तध्वान्तस्सन् प्रभाकरवत् साहित्याकाशे सततोज्ज्वलो जातः। अन्ये खलु रीतिरसालङ्कारवक्रोक्तयः ध्वनावेवान्तर्भूता। ध्वनिसम्प्रदायप्रतिष्ठापनानन्तरं ये आचार्यास्समागतास्ते समेऽपि ध्वनिसम्प्रदायस्य अनुगन्तारः, तत्प्रशंसकाश्चाभूवन्। यथा आचार्य मम्मटः। विमर्शकानां मतानुसारं ध्वनिकारः भवति सूत्रकारः, लोचनकारः अभिनवगुप्तः वार्तिककारः, मम्मटः भाष्यकारः इति समीकरणं स्थापितवन्तः। मम्मटचार्यस्य कारणेन ध्वनिसिद्धान्तस्य वैश्विकव्यापकता जगति व्यपृतम्। एते ध्वनेः आधारेनैव काव्यं त्रिविधमिति प्रत्यपादयन्।

साहित्यशास्त्रे शब्दः त्रिविधः भवतीति, अर्थोऽपि त्रिविध एवेति तैर्निरूपितम्। अर्थाः त्रिविधाः यथा– वाच्य–लक्ष्य–व्यङ्ग्यभेदेन। वाच्यस्यार्थस्य अङ्गीकारं कुर्वन् लक्ष्यार्थञ्च प्रतिपाद्य बहवः आलङ्कारिकाः अनेकान् सिद्धान्तान् उपपादयमासुः। ध्वनिः अलंकारः च प्राचीनैराचार्यैः अलंकाराणामेव वैशिष्ट्यमवगतम् वामनाचार्यैः उक्तं **सौन्दर्यमलंकारः** इति। परन्तु ध्वनिवादिभिराचार्यैः अलङ्कारसिद्धान्तस्य सूक्ष्मविवेचनेन अलंकारास्तु शरीरस्थानीयाः, ध्वनिरेवात्मस्थानीय इति निरूपितम्। इत्थं साहित्यशास्त्रे शरीरवादस्य प्रतिकूलरूपेण आत्मवादः प्रतिष्ठापितः इति प्रतिभाति। आत्मवादचिन्तनं रीतिरात्माकाव्यस्य इति सिद्धान्तस्य कर्तुः वामनस्य अनुयायिनः सन्तः आत्मतत्वं स्वीकृत्य रीतेः स्थाने ध्वनितत्त्वस्य सिद्धान्तं स्वीकृत्य सदुद्देश्येन ध्वन्यालोकस्य रचना जाता। अस्य रहस्यस्योद्घाटनं ध्वन्यालोकस्य व्याख्याने अभिनवगुप्तपादाचार्यैः कृतम्। तैरुक्तं यत्–**वाच्यसंवलनाविमोहितहृदयैस्तु तत्पृथग्भावे विप्रतिपद्यते, यथा चार्वाकैः शरीरमेवात्मेति प्रतिपादितम् अपि च शरीरापेक्षया नान्यदस्तीति च तैः निर्दिष्टं तथैवकैश्चिदालंकारिकैः वाच्यार्थसौन्दर्यविमोहितमानसै, वाच्यमेव सर्वं वाच्यापेक्षया नान्यत् किमपि भवति इत्यूचुः। ते खलु वाच्यव्यतिरेकिणो ह्यर्थस्य पृथगस्तित्वस्वीकारे सन्देहं प्राकटयन्।**[1]

ध्वन्यालोकग्रन्थः काव्यस्य आत्मतत्त्वण्वेषणाय विरचितः, तस्यैव तत्त्वस्य महतीं प्रतिष्ठां प्रदातुमस्य ग्रन्थस्य प्रयत्नः। यदेतत् आत्मस्थानीयं परमोत्कृष्टं रमणीयं च तत्त्वं विद्यते तद्वस्तुतः शब्दस्य चतुर्थकक्ष्यानिविष्टः अर्थः स एव "व्यंग्य" इत्युच्यते। कविवाणी तदैव सफला भवति, यदा हि सा तस्य विशिष्टस्यार्थस्य वाहिका भविष्यति। विषयोऽयं आनन्दवर्धनाचार्यपूर्ववर्तिभिः कैश्चित्प्रसिध्दैरालंकारिकैः स्पष्टतया नावगतः इति प्रतिभाति। तैः व्यंग्यार्थः पर्यायोक्तादि–अनेक–अलंकारेषु यद्यपि अनुभूता तथापि ते वाच्यार्थापेक्षया व्यंग्यार्थस्य चारुत्वेन विश्वसन्ति स्म। अनेन कारणेन व्यंग्यस्यात्र स्थितिः सर्वदा वाच्यानुगतैवासीत्। वाच्यार्थस्पर्शलेशशून्ये रसभावादितत्त्वेऽपि ते रसवदलंकारतैवोपपादितायदि प्राणस्थानीयेऽस्मिन् तत्त्वे तेषां बुद्धिः प्रसारिता अभविष्यत् तर्हि ते एकस्य सारभूतस्य विषयस्य आविष्करमकरिष्यन्।

- **ध्वनिचिन्तनस्त्रोतः**

साहित्यशास्त्रे सम्प्रदायाणां मध्यवर्तीस्थाने समागतः ध्वनिसम्प्रदायः आनन्दवर्णचार्येण आनीतः। साहित्यसिद्धान्तेष्वेव ध्वन्याख्यः कश्चन नवीनः शब्दः तैः प्रयुक्तः। व्याकरणशास्त्रस्य मूलत्वात् वैयाकरणानां सर्वत्र मान्यत्वात् ध्वनिशब्दः नवीनत्वेन साहित्यशास्त्रस्य कृते प्रयुक्तः। ध्वनिस्तु प्रतीयमानार्थ एव। एवंस्थिते सोऽयं प्रतीयमानार्थः प्राचीनानाम् आक्षेप–अप्रस्तुतप्रसंशा–समसोक्ति–व्याजस्तुत्याद्यलंकारेषु विद्यते एवेति तैः संकेतितः। रसगङ्गाधरकारेण तु पर्यायोक्तप्रकारेण विषयोऽयमंगीकृतः, तद्यथा "ध्वनिकारात् प्रचीनैर्भामहोद्भटप्रभृतिभिः स्वग्रन्थेषु कुत्रापि ध्वनिगुणीभूतव्यंग्यादिशब्दाः न

[1]. ध्व.लो.(लोचनम्) प्रथमोद्योतः, पृ.सं.–45

प्रयुक्ता:। इत्येतावतैव तै: ध्वन्यादयो न स्वीक्रियन्ते इत्याधुनिकानां वाचोयुक्तिरयुक्तैव अत: समासोक्ति–व्याजस्तुत्यप्रस्तुतप्रशंसा ह्यलंकारनिरूपणे कियन्तोऽपि गुणीभूतव्यंग्यप्रभेदास्तैरपि निरूपिता:। अपरं च सर्वोऽपि व्यंग्यप्रपंच: पर्यायोक्तकुक्षौ निक्षिप्त:। न ह्यनुभवसिद्धोऽर्थो बालेनाप्यपह्नोतुं शक्यते। ध्वन्यादिशब्दै: परं व्यवहारो न कृत:। न ह्येतावता अनङ्गीकारो भवति। प्राधान्यादलंकार्यो हि ध्वनिरलंकारस्य पर्यायोक्तस्य कुक्षौ कथंकारं निविशितामिति तु विचारान्तरम्"।

आनन्दवर्धनाचार्यैरपि विषयोऽयं संसूचित एवासीत्, "यद्यपि ध्वनिशब्दसंकीर्त्तनेन काव्यलक्षणविधायिभिर्गुणवृत्तिरन्यो वा न कश्चत्प्रिकार प्रकाशित:। तथापि अमुख्यवृत्याकाव्येषु व्यवहारं दर्शयता ध्वनिमार्गों मनाक् स्पृष्टोऽपि विषयेऽस्मिन् लोचनव्याख्यानमपि पठनीयं भवति[2]न लक्षित:"।

- **प्रतीयमानार्थ:**

तत्रादौ प्रतिपादितं यत्काव्यस्य आत्मा ध्वनिरिति काव्यतत्त्वविद्भिराचार्यै: प्रागेवप्रतिपादितम्। तथापि केचन ध्वनिर्नामापूर्वं तत्त्वं किमपि नास्तीति ऊचु:। तदर्थमेव आचार्येण ध्वने: स्वरूपं प्रतिपादितम्– **यत्रार्थ शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ** इति। अनेन सौन्दर्यपूर्णेण प्रतिपादनेन सहृद्यानां मन: प्रीतिर्भवेदित्याचार्याणाममभिप्राय:। ध्वनिर्नाम क: इति विचार्यमाणे वाच्यादर्थात् भिन्न: चमत्कारपूर्ण: कश्चन नवीन: अर्थविशेष: एव ध्वनिरिति ज्ञातव्यम्। एतादृशेन सहृदयाह्लादकारिणा अर्थेन पूर्णं काव्यमेव ध्वनिकाव्यम्। आचार्यै: प्रतिपादितं यत् सहृदयश्लाघ्यस्य अर्थविशेषस्य भेदद्वयं भवति । तथा चोक्तं–

**योऽर्थ: सहृदयश्लाघ्य: काव्यात्मेति व्यवस्थित:।**
**वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ॥**[3]

अयमेवार्थ: काव्यात्मरूपेण राजते। अर्थस्यास्य भेदद्वयं भवति, एक: वाच्य:, अन्यश्च प्रतीयमान:। एवं स्थिते वाच्य: अर्थ: कीदृश: ? तस्य के प्रकारा: भवन्ति ? कथं च अयमर्थ: काव्यस्य जीवातुरूपेण प्रकाशते इत्यादि विषया: अन्यै: पूर्ववर्तिभि: ? अलङ्कारवादिभिराचार्यै: विशदीकृता:। यतोहि तेषामाचार्याणां मते वाच्य एवं प्रधानतम:। अथ पुनरिमे विषया यदि प्रतिपाद्यन्ते, केवलं तत् चर्वितचर्वणं भविष्यति अथवा पिष्टपेषणं भविष्यति। प्रतीयमानस्य पुन: अर्थस्य विषये अन्यै: पूर्ववर्तिभि: आचार्यै: नोक्तं किञ्चिद् अथवा कथं वक्तुं शक्यते ? इत्यपि चिन्तयितुं शक्यते। प्रतीयमान: कश्चन अर्थ: अस्तीति, स च काव्यस्य प्राणभूत इति वाच्यर्थसक्तमनस: कथं वा ज्ञातुं समर्था: भवेयु: ? अत: आचार्यै: प्रतीयमानस्यार्थस्य विषये सुष्ठु विचार: कृत:, उक्तञ्च–

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनां ।**
**यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥**[4]

अर्थात् महाकवीनां वाणीषु प्रतीयमानाख्यं अन्यदेव वस्त्वस्ति निखिलावयवातिरिक्तं लावण्यं येन प्रकारेण विभाति तेनैव प्रकारेण अलङ्कारादिविविधावयवव्यतिरिक्तं प्रतीयमानाख्यं वस्तु अपि काव्येषु विभाति। काव्यमपि कन्यया सदृशं भवति अत एव काव्यकन्या इत्युच्यते काव्यम्। इत्थम् आचार्यै: या तुलना कृता तया च तुलनया यस्य विशिष्टस्यार्थस्य प्रतिपादनं कृतं, तदपूर्वमेव प्रतिभाति। समग्रेऽपि ध्वन्यालोके इयमेव रीति: प्रचलिता। ध्वनिरिति अपूर्वोऽयं विषय:।

---

[2].ध्वन्यालोक:– प्रथमोद्योत:– पुटम्–

[3]. ध्वन्यालोक:, 1.2

[4]. ध्वन्यालोक:, 1.4

ध्वनिशब्दश्रवणसमन्तरमेव जिज्ञासा उदेति कोऽयं ध्वनिरिति। वस्तुतः प्रतीयमानार्थ एव ध्वनिः। परन्तु आचार्यैः ध्वनेस्तावल्लक्षणं सुष्ठु प्रतिपादितम्-

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनी कृतस्वार्थौ।**
**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥**[5]

ध्वनिरिति विशिष्टं किञ्चिद्वाक्यम्। काव्येऽस्मिन् वाचकः शब्दः स्वीयमर्थं वाच्यं च आत्मानं गौणं कृत्वा तस्य प्रतीयमानस्यार्थस्य प्रतीतिं कुरुतः। प्रतीयमानार्थोऽयं ललनालावण्यप्रख्यः सारभूतः सहृदयश्लाघ्यः, चमत्कारकारी अर्थः।

**ध्वनिशब्दः-** परन्तु ध्वन्यालोकस्य परिशीलनेन ध्वनिशब्दः न केवलं ध्वनिकाव्यार्थे, अपि अन्येष्वपि अर्थेषु कृत इति ज्ञायते। तेषु अन्येष्वर्थेषु व्यङ्ग्यार्थः प्रधानः। व्यङ्ग्यार्थे ध्वनिशब्दः बहुधा प्रयुक्तः आनन्दवर्धनाचार्यैः। काव्यस्यात्मा ध्वनिरिति" इत्यमिन् श्लोके 'आत्मा' काव्यस्यार्थ एवेति आनन्दवर्धनाचार्यस्य मतम्। तेषां मते यदि काव्यस्य जीवातुभूतः कश्चिदर्थो भवति, तर्हि सः प्रतीयमान एवेति । अनेन प्रकारेण काव्यात्मरूपेण गृहीतः ध्वनिपदार्थः कश्चनकाव्यप्रकारः न भवति, परन्तु काव्यस्यैव एकः विशिष्ट अंशः भवतीति व्यवस्थितम् ।विषयेऽस्मिन् आनन्दवर्धनाचार्याणां सम्मतिरासीदिति अन्यैः तत्रस्थैः वाक्यैरेवज्ञायते।"मुख्यतया प्रकाशमानो व्यङ्ग्यार्थो ध्वनेरात्मा" इत्येकं वाक्यम्। वस्तुतः ध्वन्यालोकस्य प्रथम श्लोक एवं काव्यस्यात्मा ध्वनिरिति उक्तम्। काव्यस्यात्मा च रसादिरूप एवार्थः इति। अनेन ज्ञायते यत् ध्वनिकृता स्वयमेव ध्वनिरर्थरूपेण स्वीकृतः। ध्वनिः व्यङ्ग्यार्थस्य पर्यायरूपेण स्वीकृतः। अतएव ध्वनिः काव्यरूपोद्यानस्य कल्पतरुर्विद्यते। तद्यथा

**काव्याख्येऽखिलसौख्यधानि विबुधोद्याने ध्वनिदर्शितः।**
**सोऽयं कल्पतरूपमानमहिमा भोग्योऽस्तु भव्यात्मनाम्॥**[6]

ध्वन्यालोके ध्वनिशब्दः व्यञ्जकरूपेणापि प्रयुक्तः। तद्यथा –पदानामपि व्यञ्जकत्वमुखेन व्यवस्थितो ध्वनिव्यवहारः।अपरञ्च – " यस्य तु विवक्षितत्वेन व्यङ्ग्यस्य स्थितिः तद्व्यञ्जकत्वं ध्वनिव्यवहारस्य प्रयोजकम् ।" उक्त्यन्तरेण यच्चारुत्वप्रकाशनमशक्यं तत्प्रकाशयन् शब्दः व्यञ्जकतां प्राप्यध्वनिरित्यस्य वाचकस्य वाच्यो भवति।

**उक्त्यन्तरेणाशक्यं यच्चारुत्वं प्रकाशयन्।**
**शब्दो व्यञ्जकतां बभ्रद् ध्वन्युक्तेविषयी भवेत्॥**[7]

अस्यैव विषयस्य व्यतिरेकरूपेण अन्यस्मिन् श्लोके किञ्चिदुक्तं, तद्यथा

**रूढा ये विषयेऽन्यत्र शब्दाः स्वविषयादपि ।**
**लावण्याद्याः प्रयुक्तास्ते न भवन्ति पदं ध्वनेः॥**
**अव्युत्पत्तेश्च शक्तेर्वा निबन्धो यः स्खलगतेः।**
**शब्दस्य स च न ज्ञेयः सूरिभिर्विषयो ध्वनेः॥**[8]

---

[5]. ध्वन्यालोकः, 1.13

[6]. ध्वन्यालोकः, चतुर्थोद्योतः, पृ.सं.- 601

[7]. ध्वन्यालोकः, 1.15

ध्वनिशब्दप्रयोग: अनेन प्रकारेण स्पष्टमेव यत् ध्वनिकारेण ध्वनिशब्दप्रयोग: विभिन्नेषु अर्थेषु कृत: ।

परन्तु तथापि विभिन्ना: प्रयोगा इमे परस्परविरुद्धा: इति तु वक्तुं न शक्यते। एतेषां सर्वेषां तु ह्यर्थानां समन्वयं ध्वनिकार एव कृतवान् स्वीयेन पाण्डित्येन, प्रज्ञया च तत्कथमिति सम्प्रति पश्याम:। काव्यं ध्वनिरिति, व्यञ्जकपदानि च ध्वनिरिति च कथने नास्ति कश्चन विरोध:। अस्योत्तरं प्रदत्तमेव। पदं काव्यस्यैवाङ्गभूतमिति कृत्वा अन्वयव्यतिरेकाभ्यां एकांशभूतेष्वपि पदेषु ध्वनिव्यवहार: प्रतिष्ठित: भवति। परन्तु ध्वनि: काव्यस्यात्मेति स्वीकृत: इति कारणेन ध्वनेरर्थो भवति यत् ध्वन्यमान: अर्थ: एव अर्थात् व्यङ्ग्यार्थ एव। यस्मिन्काव्ये ईदृशो ध्वनि: अर्थात् व्यङ्ग्यार्थ एव प्रधानरूपेण व्यञ्जितो भवति, तत् सम्पूर्ण काव्यमेव ध्वनिकाव्यमिति व्यपदिश्यते "प्राधान्येन व्यपदेशा: भवन्ति" इति न्यायात्। उक्तमेव- “यत्र व्यङ्ग्यपरत्वेनैव वाच्यस्य व्यवस्थानं तत्र व्यङ्ग्यमुखेनैव व्यपदेशो युक्त:"।

तथा च "व्यञ्जकत्वसाम्याद् ध्वनि:" इत्यनया दृष्ट्या न काव्यं तत् ध्वनिकाव्यमिति व्यपदिश्यते। एतादृश्यां स्थितौ सम्पूर्णमपि काव्यं रसादिरूपमर्थं व्यञ्जयत् व्यञ्जकत्वं बिभर्ति। यदि व्यङ्ग्यमर्थं ध्वनिरूपेण स्वीकुर्म:, तर्हि तस्यार्थस्य प्राप्त्यर्थं साधुरूपेण यो व्यञ्जनाव्यापार: स्वीकृत:, तमपि व्यापारमुपचारत: ध्वनिरिति वक्तुं शक्नुम:।

### ❖ ध्वनिलक्षणम्

काव्ये प्रधानव्यङ्गयार्थरूप: ध्वनि:। इत्थं ध्वनि: काव्यस्यात्मा। ध्वने: लक्षणं ध्वन्यालोकस्य प्रथमोद्योते आनन्दवर्धनाचार्येण प्रदत्तम्-

**यत्रार्थ: शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**
**व्यङ्क्त: काव्यविशेष: स ध्वनिरिति सूरिभि: कथित:॥**[9]

अर्थात् यत्र अर्थ: आत्मानं तथा शब्द: स्वस्यार्थं गौणं कृत्वा तमर्थं (प्रतीयमानार्थं) प्रकाशयति,तं काव्यविशेषं विद्वांस: ध्वनिरिति कथयन्ति। ध्वनिकार: स्वयं तस्य व्याख्यां करोति यत्- यत्रार्थोवाच्यविशेष:,वाचकविशेष: शब्दो वा तमर्थं व्यङ्क्त:,स: काव्यविशेष: ध्वनिरिति। इदं लक्षणं व्यङ्गयार्थस्य तथा व्यङ्गयार्थप्रधानकाव्यस्य कृते सम्भवति। लक्षणेन अनेन वाच्यवाचक- चारुत्वहेतुभ्य: उपामादिभ्य: अनुप्रासादिभ्य: च ध्वने: विषय: भिन्न: इति प्रदर्शितम्। 'स: अर्थ: इत्युक्ते प्रतीयमानार्थ:। स: प्रतीयमानार्थ: स्वादु: 'महाकवीनां वाणीषु वाच्याश्रितालङ्कारदिभ्य: भिन्न:। काव्यविशेषस्य तात्पर्यं वर्तते अर्थो वा शब्दो वा व्यापारो वा ध्वनिसंज्ञा न केवल काव्यस्य कृते अपितु शब्दस्य,अर्थस्य,शब्दार्थयो: व्यापारस्य कृते च। व्युत्पत्तिद्वारा अपि ध्वनिशब्दस्य पञ्चभेदा: भवन्ति यथा-

1. ध्वनति ध्वनयति वा य: स व्यञ्जक: शब्द: ध्वनि:।
2. ध्वनति ध्वनयति वा य: स व्यञ्जकोऽर्थ: ध्वनि:।
3. ध्वन्यते इति ध्वनि:।
4. ध्वन्यते अनेन इति ध्वनि:।
5 . ध्वन्यतेऽस्मिन्निति ध्वनि:।

[8]. ध्वन्यालोक:, 2.32

[9].ध्वन्यालोक 1. उद्योत:

एवं ध्वने: प्रयोग: विविधपञ्चसु अर्थेषु भवति। ते पञ्च अर्था:-

1. व्यञ्जकशब्द:।
2. व्यञ्जकार्थ:।
3. व्यङ्गयार्थ:।
4. व्यञ्जनाव्यापार:।
5. व्यङ्ग्यप्रधानकाव्यम्। इति।

संक्षेपेण ध्वने: अर्थो भवति व्यङ्ग्य:, किन्तु पारिभाषिकरूपेण स: व्यङ्ग्य: वाच्यातिशायी भवेत्। उक्तं च साहित्यदर्पणे 'वाच्यातिशायिनि व्यङ्ग्ये ध्वनि:[10]' इति। अस्य आतिशय्यस्य अथवा प्राधान्यस्य आधारो वर्तते चारुत्वं वा रमणीयताया: उत्कर्ष:। 'वाच्यातिशायी' इति शब्दस्य अर्थो भवति वाच्यात् अधिकरमणीय:। एवं ध्वने: संक्षिप्तं लक्षणं सञ्जायते 'वाच्याधिकरमणीय: व्यङ्ग्य: ध्वनि:' इति।

- **ध्वनिविरोधिनां मतम् एवं ध्वने: स्थापना**

ध्वनिस्वरूपविवेचनस्यावश्यकतां दर्शयन् आनन्दवर्धन: 'कथं ध्वनिविषये विदुषां विप्रतिपत्तिरासीत् 'इति प्रदर्शयति ध्वन्यालोकस्य प्रथमकारिकायाम्

**काव्यस्यात्मा ध्वनिरिति बुधैर्यस्समाम्नातपूर्व:**
**तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।**
**केचिद् वाचां स्थितमविषये तत्वमूचुस्तदीयम्**
**तेनब्रूम: सहृदयमन: प्रीतये तत्सवरूपम्॥**[11]

ध्वनिसिद्धान्त: अनन्तरं सर्वसामान्य: सञ्जात:,किन्तु आरम्भे तस्य विरोध: आसीत्। ध्वनिविरोधिन: त्रिविधा: ध्वन्यभाववादिन: भाक्तवादिन:,अनिर्वचनवादिनश्च त्रयाणां मतानां पूर्वपक्षरूपेण उल्लेखं कृत्वा आनन्दवर्धन: सिद्धान्तपक्षे (उत्तरपक्षे) तस्योतरं प्रददाति।

- **पूर्वपक्ष: (ध्वनिविरोधिन:)**
- **ध्वन्यभाववादिन:**

  ध्वने: सर्वथा अभाव: वर्तते इति अभाववादीनां मतम्।

- **भाक्तवादिन:-**

भाक्तवादीनां मतानुसारं ध्वने: अन्तर्भाव: भक्तौ (लक्षणायां भवति) अनिर्वचनवादिन:-ध्वनि: अवर्णनीय: इति अनिर्वचनवादिन: एवं मतत्रयस्यास्यां कारिकयामुल्लेख: कृत:। अत्र कस्यापि नामोल्लेखनमकृत्वा ध्वनिविरोधस्य केवलं

[10].साहित्यदर्पण: 2. परिच्छेद:

[11].ध्वन्यालोक: 1. उद्योत:

कल्पना कृता वर्तते। अभाववादीनां निर्देशेऽत्र 'जगदु:'इति तथा अनिर्वचनीयवादीनां निर्देशे 'ऊचु:'इति परोक्षभूतकालस्य प्रयोगं करोति आनन्दवर्धन:अत: इदं पक्षद्वयमपि सम्भावितं कल्पनायुक्तं प्रतिभाति। किन्तु भाक्तवादीनां निर्देश: 'आहु: 'इति वर्तमानकालस्य क्रियापदेन कृत:। तेन ज्ञायते यत् आनन्दवर्धनस्य समये भाक्तवादिन: आसन् इति।

- **ध्वनि: निर्विषया इति केचन स्वीकुर्वन्ति।**

ध्वनिशब्दाय आलङ्कारिका: वैयाकरणानाम् ऋणिन: सन्ति। वैयाकरणैर्हि स्फोटरूपमुख्याचायै: व्यक्तिविधायकशब्दाय ध्वने: प्रयोग: कृत:। आलङ्कारिकैस्तु अस्मिन्नेव साम्ये ध्वनिशब्दं गृहीत्वा एतस्य विस्तृतो व्यापकञ्चार्थो विहित:।

**य: संयोगवियोगाभ्यां करणैरूपजन्यते।**

**स: स्फोट: शब्दज: शब्दो ध्वनिरित्युच्यते बुधै:॥**[12]

अलङ्कारस्य इतिहासे"ध्वनि:"कल्पना अतिसूक्ष्मबुद्धिपरिचायिका अस्ति। अत एव अयं संप्रदाय: सर्वप्रसिद्ध: स्वीकृत: सम्प्रदाय: वर्तते।

- **ध्वनिभेदा:**

ध्वने: बहव: भेदा: निरूपिता: । तत्र प्रथमं तावत् ध्वने: भेदद्वयं प्रतिपादितम् – १. अविवक्षितवाच्यध्वनि: २. विवक्षितान्यपरवाच्यध्वनि: च इति । उक्तमेव ध्वन्यालोके – अस्ति ध्वनि: स च अविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेति द्विविध: सामान्येन । ( ध्वन्यालोक: )

- **अविवक्षितवाच्यध्वनि:**

अविवक्षितवाच्यस्य मूले लक्षणा भवति। अत: लक्षणाधारेणैव अस्यापि भेदा: संभवन्ति। तर्हि प्रथमं तावत् लक्षणायां कति भेदा: भवन्तीति पश्याम:। लक्षणायां मूलत: भेदद्वयं भवति– १. उपादानलक्षणा २. लक्षणलक्षणा चेति ।

यत्रार्थ: शब्दो वेति' कारिकायां 'गुणीकृतस्वार्थौ' इत्युक्तम् । तत्र 'गुणीकृताभिधेय: शब्द:'' अर्थो गुणीकृतात्मा' इत्यभिप्राय: अर्थस्य गुणीकृतात्मत्वं लक्षणामूलध्वनावप्यस्ति। तथा हि तत्र लक्षणामूलध्वने: द्वौ भेदौ, यदुक्तम् –

**अर्थान्तरे सङ्क्रमितम् अत्यन्तं वा तिरस्कृतम् ।**

**अविवक्षितवाच्यस्य ध्वनेर्वाच्यं द्विधा मतम्॥**[13]

तत्र प्रथमोभेदोऽस्ति अर्थान्तरसङ्क्रमितवाच्य: , द्वितीयस्तु अत्यन्ततिरस्कृतवाच्य इति । तत्र प्रथमे भेदे योऽर्थ उपपद्यमानोऽपि तावतैवानुपयोगात् धर्मान्तरसंवलनया अन्यतामिव गतोऽपि लक्ष्यमाणोऽनुगतधर्मी सूत्रन्यायेनास्ते स रूपान्तरपरिणत: अर्थान्तरसङ्क्रमित उच्यते। द्वितीय भेदे, वस्तु अर्थ: अनुपपद्यमान: उपायतामात्रेणार्थान्तरप्रतिपत्तिं कृत्वा पलायत इक स: तिरस्कृत इति अत्यन्ततिरस्कृतवाच्यो भवति।

- **विवक्षितान्यपरवाच्यध्वनि:**

"यस्मिन् ध्वनौ वाच्यं वाच्योऽर्थ: विवक्षितं वाच्यतावच्छेदरूपेण अन्वयबोधविषय: अन्यपरं व्यङ्ग्योपसर्जनीभूतं च स: विवक्षितान्यपरवाच्य:" (बालबोधिनी) ।

विवक्षितान्यपरवाच्यध्वनि: ध्वनिप्रकारस्यास्य भेदद्वयं भवति ।

---

12.वाक्यपदीये ब्रह्मकाण्ड:

13. ध्वन्यालोक:, 2.1

**1.असंलक्ष्यव्यंग्यम्**

**2. संलक्ष्यक्रमव्यंग्यं चेति ।**

तदेव प्राह –

**असंलक्ष्यक्रमोद्योत: क्रमेण द्योतित: पर: ।**
**विवक्षिताभिधेयस्य ध्वनेरात्मा द्विधा मत:॥**[14]

असंलक्ष्यक्रमव्यंग्यस्य विषयास्तावत्- रस-रसभाव-भावभावादय:। संलक्ष्यक्रमव्यंग्यस्य तु भेदद्वयं भवति- शब्दशक्तिमूल:, अर्थशक्तिमूलश्चेति। अर्थशक्तिमूलध्वने: भेदा: अध: आलोच्यन्ते-




**उपसंहार:**

प्रबन्धेऽस्मिन् सर्वेषु शास्त्रेषु प्रतिपादिता: ध्वनिसम्बन्धिविषय: अत्र संक्षेपेन सारल्येन च मया प्रस्तुत:। अस्मिन्प्रबन्धे ध्वनिचिन्तनस्त्रोत:, ध्वनिशब्द:, ध्वनिलक्षणम्, ध्वनिस्वरूपम्, ध्वनिविरोधिनां मतम् एवं ध्वने: स्थापना, ध्वनिभेदा:, इति विषयान् स्वीकृत्य मम प्रबन्धकार्यं समपद्यत।

**परिशीलितग्रन्थसूची**

1. ध्वन्यालोक:, श्रीमदानन्दवर्धनाचार्य:, आचार्य जगन्नाथ पाठक,चौखाम्बा विद्याभवन, वाराणसी-221001
2. ध्वन्यालोक:, श्रीमदानन्दवर्धनाचार्य:, गङ्गासागरराय:, चौखाम्बा संस्कृत भवन, वाराणसी-221001
3. मम्मट:, काव्यप्रकाश:, "आज" भवन् सन्त कबीर मार्ग, वाराणसी 221001)यू( पी., जुलाई, 2016
4. वाक्यपदीयब्रह्मकाण्ड:, पण्डित वेदानन्द झा, मन्दाकिनी संस्कृतविद्वत्परिषद्, दिल्ली
5. वामन:, काव्यालङ्कारसूत्रवृत्ति:, प्रोकेदारनाथ शर्मा ., कृष्णदास अकादेमी, वारणसी – 1979
6. विश्वनाथ:, साहित्यदर्पण:, आचार्य: कृष्णमोहनशास्त्री, चौखम्बा संस्कृत संस्थान वाराणसी, पुनमुर्द्रण – 2013

[14]. ध्वन्यालोक:, 2.2

7. संस्कृत शास्त्र का इतिहास, बलदेव उपाध्याय, शारदा मंदिर, वाराणसी, 1969
8. संस्कृतवाङ्मय का बृहत् इतिहास, (संबलदेव उपाध्याय(, उत्तरप्रदेश संस्कृत संस्थान, लखनऊ, 2001
9. संस्कृतव्याकरणशास्त्र का इतिहास पं युधिष्ठिरमीमांसक, रामलालकपूर ट्रस्ट
10. संस्कृतसाहित्य का इतिहास, वाचस्पति गैरोला, चौखम्बासंस्करणम्, काशी
11. संस्कृतसाहित्येतिहासः, आचार्य रामचन्द्रमिश्र, चौखम्बावाराणसी –, 1970
12. साहित्यदर्पणः, विद्यावाचस्पतीसाहित्याचार्यशालिग्रामशास्त्रिविरचितयविमलाव्याख्या, मोतिलाल बनारसीदास, 2009